एष पन्था महर्षीणां फलान्याहरतां वनात् ।
अनेन तु सुदुर्गं ते प्रविशन्ति महर्षयः ॥ १७ ॥
रावणावरजो राम खरो नामेह राक्षसः ।
उद्वेजयति नः सर्वान् जनस्थानकृतालयान् ॥ १८ ॥
दुष्टश्च जितकाशी च नृशंसश्च बलोत्कटः ।
अवलिप्तसहायश्च त्वां च तात न मृष्यति ॥ १९ ॥
त्वं यदाप्रभृति ह्यस्मिन्नाश्रमे तात वर्तसे ।
तदाप्रभृति रक्षांसि विप्रकुर्वन्ति तापसान् ॥ २० ॥
दर्शयन्तोऽतिबीभत्सं क्रूरैर्भीषणकैरपि ।
नानारूपैर्विरूपास्ते रूपैरशुभदर्शना ॥ २१ ॥
उपचारैरशुचिभिः संप्रयुज्य च तापसान् ।
दर्शयन्ति परां हिंसामनार्याः पुरुषर्षभ ॥ २२ ॥
गहनेष्वाश्रमान्तेषु लीना विकृतदर्शनाः ।
रमन्ते तापसांस्तत्र त्रासयन्तः सुदारुणाः ॥ २३ ॥
अपक्षिपन्ति स्रुग्भाण्डं दूषयन्ति शृतं हविः ।
शोणितैर्बलिकर्माणि नाशयन्ति समन्ततः ॥ २४ ॥
विश्वस्तानामविश्वस्तास्तापसानां तपस्विनां ।
भैरवं कर्णमूलेषु विसृजन्ति महास्वनं ॥ २५ ॥
कलसांश्चाप्रमत्तानां पुष्पाणि समिधस्तथा ।
दर्भांश्चादाय गच्छन्ति होमकाले सुदारुणाः ॥ २६ ॥

Digitized by Google